तेन प्रवालवर्णश्च कुमारः समजायत ।
तेजसा सूर्य्यसदृशो नारायणसुतो महान् ॥”
इति ब्रह्मवैवर्त्तपुराणे, ६ अध्यायः ॥

अपि च ।
“ततोऽङ्गारकलोको हि वसत्यत्र महीसुतः ।
उत्पत्तिश्चास्य वक्ष्यामि यथायं भूसुतोऽभवत् ॥
पुरा हि भ्रमतो विष्णोः स्वेदबिन्दुः पपात ह ।
महांस्ततः कुमारोऽसौ लोहिताङ्गो महीतलात् ॥
जातः स्नेहेन मेदिन्या वर्द्धितः पृथिवीपते ! ।
तपसाराध्य ब्रह्माणं ग्रहत्वमुपसेदिवान् ॥”
इति पाद्मे स्वर्गखण्डे ११ अध्यायः ॥

अपरञ्च ।
“पुरा दक्षविनाशाय कुपितस्य त्रिशूलिनः ।
अपतद्भीमवक्त्रस्य स्वेदबिन्दुर्ललाटजः ॥
भित्त्वा समस्तपातालानदहत् सप्त सागरान् ।
अनेकवक्त्रनयनो ज्वलज्ज्वलनभीषणः ॥
वीरभद्र इति ख्यातः करपादायुतैर्युतः ।
कृत्वा स यज्ञमथनं पुनर्भूतलसम्भवः ॥
त्रिजगन्निर्दहन् भूयः शिवेन विनिवारितः ।
कृतं त्वया वीरभद्र ! दक्षयज्ञविनाशनम् ॥
इदानीमलमेतेन लोकदाहेन कर्म्मणा ।
शान्तिप्रदानात् सर्व्वेषां ग्रहाणां प्रथमो भव ॥
प्रेक्षिष्यन्ति जनाः पूजां करिष्यन्ति मतं मम ।
अङ्गारक इति ख्यातिं गमिष्यसि धरात्मज ! ॥
देवलोके द्वितीयञ्च तव रूपं भविष्यति ।
ये च त्वां पूजयिष्यन्ति चतुर्थ्यां त्वद्दिने नराः ।
रूपमारोग्यमैश्वर्य्यं तेष्वनन्तं भविष्यति ॥
एवमुक्तस्तदा शान्तिमगमत् कामरूपधृक् ।
संजातस्तत्क्षणाद्राजन् ! ग्रहत्वमगमत् पुनः ॥”
इति मत्स्यपुराणे अङ्गारकव्रतं नाम ६८ अः ॥

कल्पभेदे अन्धकासुरवधकाले तस्योत्पत्तिर्यथा,
“यो भूम्यां न्यपतद्विप्र ! स्वेदबिन्दुः शिवाननात् ।
तस्मादङ्गारपुञ्जाभो बालकः समजायत ॥
स बालस्तृषितोऽत्यर्थं पपौ रुधिरमान्धकम् ।
कन्या चोत्स्वेदसंजाता सा त्वगिलिलिहेऽद्भुता ॥
ततस्तामाह बालार्कप्रभो भैरवमूर्त्तिमान् ।
शङ्करो वरदो लोकश्रेयोऽर्थाय वचो महत् ॥
त्वां पूजयिष्यन्ति सुरा ऋषयः पितरस्तथा ।
यक्षविद्याधराश्चैव मानवाश्च शुभङ्करि ! ॥
त्वां स्तोष्यन्ति सदा देवि ! बलिपुष्पोत्करैः करैः ।
चर्च्चिकेति शुभं नाम यस्माद्रुधिरचर्च्चिता ॥
इत्येवमुक्ता वरदेन चर्च्चिका
भूतानुयाता हरिचर्म्मवासिनी ।
महीं समन्ताद्विचचार सुन्दरी
स्थलं गता हैङ्गुलमाद्यमुत्तमम् ॥
तस्यां गतायां वरदः कुजस्य
प्रादाद्वरं सर्व्ववरोत्तमं यतः ।
ग्रहाधिपत्यं जगतः शुभाशुभं
भविष्यति त्वद्वशगं महात्मनाम्॥
इति वामनपुराणे ६७ अध्यायः ॥

अस्य स्तोत्रं यथा,—
“धरणीगर्भसंभूतं विद्युत्पुञ्जसमप्रभम् ।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम् ॥”
इति व्यासोक्तनवग्रहस्तोत्रान्तर्गतम् ॥

ऋणपरिशोधनार्थस्तोत्रं यथा,—
“मङ्गलो भूमिपुत्त्रश्च ऋणहन्ता धनप्रदः ।
स्थिरासनो महाकायः सर्व्वकर्म्माविरोधकः ॥
लोहितो लोहिताक्षश्च सामगानां कृपाकरः ।
धरात्मजः कुजो भौमो भूमिजो भूमिनन्दनः ॥
अङ्गारको यमश्चैव सर्व्वरोगापहारकः ।
वृष्टिकर्त्ता च हर्त्ता च सर्व्वकामफलप्रदः ॥
एतानि कुजनामानि प्रातरुत्थाय यः पठेत् ।
ऋणं न जायते तस्य धनमाप्नोति पुष्कलम् ॥
रक्तपुष्पैश्च गन्धैश्च धूपदीपादिभिस्तथा ।
मङ्गलं पूजयेद्भक्त्या मङ्गलेऽहनि सर्व्वदा ॥
ऋणरेखाः प्रकर्त्तव्या अङ्गारेण सदा बुधैः ।
प्रोञ्छयेद्वामपादेन ऋणं तस्य विनश्यति ॥
मङ्गलाय नमस्तुभ्यं नमस्ते ऋणहारिणे ।
पुत्त्रपौत्त्रप्रदात्रे च मङ्गलाय नमो नमः ॥
ऋणार्थे त्वत्प्रपन्नोऽहमनृणं कुरु मे विभो ! ।
एतत् कृत्वा न सन्देहो ऋणं हत्वा धनी भवेत् ।
इति स्कन्दपुराणम् ॥ * ॥

मङ्गलवारे जातस्य फलं यथा,—
“उग्रः प्रतापी क्षितिपालमन्त्री
रणप्रियो वक्रवचाः सरोषः ।
सत्त्वान्वितः शूरगणप्रणेता
कुजस्य वारे प्रभवो मनुष्यः ॥”
इति कोष्ठीप्रदीपः ॥

मङ्गलचण्डिका, स्त्री, ( मङ्गला मङ्गलदायिका चासौ चण्डिका चेति । यद्वा, सृष्टौ मङ्गला प्रलये चण्डिका । अथवा मङ्गले चण्डिका दक्षा । ) मङ्गलचण्डी । यथा, कालिकापुराणे ।
“येषा ललितकान्ताख्या देवी मङ्गलचण्डिका ।
वरदाभयहस्ता च द्विभुजा गौरदेहिका ॥
रक्तपद्मासनस्था च रत्नकुण्डलमण्डिता ।
रक्तकौषेयवस्त्रा च स्मितवक्त्रा शुभानना ॥
नवयौवनसम्पन्ना चार्व्वङ्गी ललितप्रभा ।
उमया भाषितं मन्त्रं यत् पूर्व्वन्त्वेकमक्षरम् ।
मन्त्रमस्यास्तु तज्ज्ञेयं तेन देवीं प्रपूजयेत् ॥”
एकमक्षरं शक्तिवीजरूपम् ।
“अष्टम्याञ्च नवम्याञ्च पूजा कार्य्या विवृद्धये ।
पटेषु प्रतिमायां वा घटे मङ्गलचण्डिकाम् ॥
यः पूजयेद्भौमदिने शुभद्व्याक्षतैः शुभाम् ।
सततं साधकः सोऽपि काममिष्टमवाप्नुयात् ॥*॥
मङ्गलवारे कृष्णाष्टमीचतुर्द्दश्यौ चेत् पुण्यतरे भवतः । यथा,—
“शनैश्चरस्य वारेण वारेणाङ्गारकस्य च ।
कृष्णाष्टमीचतुर्द्दश्यौ पुण्यात् पुण्यतरे स्मृते ॥*॥
मङ्गलवारे शुक्ला चतुर्थी चेदक्षया भवति । यथा,—
“सोमवारेऽप्यमावास्या आदित्याहे च सप्तमी ।
चतुर्थ्यङ्गारके वारे त्वष्टमी च बृहस्पतौ ॥
अत्र यत् क्रियते पापमथवा धर्म्मसञ्चयः ।
षष्टिवर्षसहस्राणि प्रतिजन्म तदक्षयम् ॥”
इति तिथ्यादितत्त्वम् ॥

मङ्गलचण्डी, स्त्री, ( मङ्गला चासौ चण्डी चेति यद्वा, देवानां मुन्यादिभक्तानां मङ्गलाय दुर्जयासुरादिमारणे चण्डी अत्यन्तकोपना । मङ्गलेचण्डी दक्षेति वा । अथवा सृष्टौ मङ्गला प्रलये चण्डी । भागवतेऽस्या नामनिरुक्तिर्यथा,—
“सृष्टौ मङ्गलरूपा च संहारे कोपरूपिणी ।
तेन मङ्गलचण्डी सा पण्डितैः परिकीर्त्तिता ॥”) दुर्गा । यथा,—
नारायण उवाच ।
“कथितं षष्ठ्युपाख्यानं ब्रह्मपुत्त्र ! यथागमम् ।
देवी मङ्गलचण्डी या तदाख्यानं निशामय ॥
तस्याः पूजादिकं सर्व्वं धर्म्मवक्त्रेण यच्छ्रुतम् ।
श्रुतिसम्मतमेवेष्टं सर्व्वेषां विदुषामपि ॥
दक्षायां वर्त्तते चण्डी कल्याणेषु च मङ्गलम् ।
मङ्गलेषु च या दक्षा सा च मङ्गलचण्डिका ॥
पूज्यायां वर्त्तते चण्डी मङ्गलेऽपि महीसुतः ।
मङ्गलाभीष्टदेवी या सा वा मङ्गलचण्डिका ॥
मङ्गलो मनुवंशश्च सप्तद्वीपधरापतिः ।
तस्य पूज्याभीष्टदेवी तेन मङ्गलचण्डिका ॥
मूर्त्तिभेदेन सा दुर्गा मूलप्रकृतिरीश्वरी ।
कृपारूपातिप्रत्यक्षा योषितामिष्टदेवता ॥
प्रथमे पूजिता सा च शङ्करेण पुरः पुरा ।
त्रिपुरस्य वधे घोरे विष्णुना प्रेरितेन च ॥
ब्रह्मन् ! ब्रह्मोपदेशेन दुर्गप्रस्थेन सङ्कटे ।
आकाशात् पतिते याने दैत्येन पातिते रुषा ॥
ब्रह्मविष्णूपदिष्टश्च दुर्गां तुष्टाव शङ्करः ।
सा च मङ्गलचण्डी च बभूव रूपभेदतः ॥
उवाच पुरतः शम्भोर्भयं नास्तीति ते विभो ! ।
भगवान् वृषरूपश्च सर्व्वेशश्च बभूव ह ॥
युद्धशक्तिस्वरूपाहं भविष्यामि तदाज्ञया ।
मयात्मना च हरिणा सहायेन वृषध्वज ! ॥
जहि दैत्यञ्च शत्रुञ्च सुराणां पदघातकम् ।
इत्युक्त्वान्तर्हिता देवी शम्भोः शक्तिर्बभूव सा ॥
विष्णुदत्तेन शस्त्रेण जघान तमुमापतिः ।
मुनीन्द्र ! पतिते दैत्ये सर्व्वे देवा महर्षयः ॥
तुष्टुवुः शङ्करं देवं भक्तिनम्रात्मकन्धराः ।
सद्यः शिरसि शम्भोश्च पुष्पवृष्टिर्बभूव च ।
ब्रह्मा विष्णुश्च सन्तुष्टो ददौ तस्मै शुभाशिषम् ॥
ब्रह्मविष्णूपदिष्टश्च सुस्नातः शङ्करः शुचिः ।
पूजयामास तां शक्तिं देवीं मङ्गलचण्डिकाम् ॥
पाद्यार्घ्याचमनीयैश्च बलिभिर्विविधैरपि ।
पुष्पचन्दननैवेद्यैर्भक्त्या नानाविधैर्मुने ! ॥
छागैर्मेषैश्च महिषैर्गण्डैर्मायातिभिस्तथा ।
वस्त्रालङ्कारमाल्यैश्च पायसैः पिष्टकैरपि ॥
मधुभिश्च सुधाभिश्च पक्वैर्नानाविधैः फलैः ।
संगीतैर्नर्त्तनैर्वाद्यैरुत्सवैः कृष्णकीर्त्तनैः ॥
ध्यात्वा माध्यन्दिनोक्तेन ध्यानेन भक्तिपूर्व्वकम् ।
ददौ द्रव्याणि मूलेन मन्त्रेणैव च नारद ।